305

श्रीः ।

शिवहररराजधानीपति-

श्रीराजादेवनन्दनसिंहबहादूरनराधिप-

संगृहीतविरचित-

शाक्तप्रमोदान्तर्गतं

अष्टमं

बगलामुखीतन्त्रम् ।

उक्तराजगुरुवंश्यपण्डितश्रीरघुरान-

दुबेजीद्वारा संशोधितम् ।

तदेतत्

खेमराज श्रीकृष्णदासश्रेष्ठिना

मुम्बय्यां

स्वकीये "श्रीवेङ्कटेश्वर" (स्टीम) यन्त्रागारे

मुद्रयित्वा प्रकाशितम् ।

तृतीयावृत्तिः ।

अस्य ग्रन्थस्य पुनर्मुद्रणाधिकारः १८६७ वार्धिक २५ तमराज

नियमानुरोधेन प्रकाशकाधीनाः सन्ति ।

अथ मंगलमुखी ध्यानम्

॥ श्रीगणेशाय नमः ॥

शाक्तप्रमोदः ।

अथ बगलामुखीतन्त्रम् ।


अथबगलामुखीध्यानम् ।

मध्येसुधाब्धिमणिमण्डपरत्नवेदीसिंहासनोपरिगताम्परिपीतवर्णाम् ॥ पीताम्बराभरणमाल्यविभूषिताङ्गीन्देवीन्नमामि धृतमुद्गरवैरिजिह्वाम् ॥ १ ॥ जिह्वाग्रमादायकरेणदेवींव्वामेनशत्रून्परिपीडयन्तीम् ॥ गदाभिघातेनचदक्षिणेनपीताम्बराढ्यान्द्विभुजान्नमामि ॥ २ ॥



अथयन्त्रोद्धारः ।

त्र्यस्रंषडस्रंवृत्तमष्टदलम्पद्मम्भूपुरान्वितम् ॥



अथमन्त्रोद्धारः ।

प्रणवंस्थिरमायाञ्चततश्चवगलामुखि ॥ तदन्तेसर्व्वदुष्टाना न्ततोवाचम्मुखम्पदम् ॥ स्तम्भयेतिततोजिह्वाङ्कीलयेतिपदद्व यम् ॥ बुद्धिन्नाशयपश्चात्तुस्थिरमायांसमालिखेत् ॥ लिखेच्चपुन रोङ्कारंस्वाहेतिपदमन्ततः ॥ षट्त्रिंशदक्षरीविद्यासर्व्वसम्पत्क रीमता ॥

अथमन्त्रः ।

ॐह्लींबगलामुखिसर्व्वदुष्टानाँवाचम्मुखंस्तम्भयजिह्वाङ्कील यकीलयबुद्धिन्नाशयह्लींॐस्वाहा ॥

अथपूजाविधिः ।

प्रातरुत्थायकृत्यादिप्राणायामान्तँविधायऋष्यादिन्यासङ्कुर्य्यात्। यथा । शिरसिनारदऋषयेनमः मुखेत्रिष्टुप्छन्दसेनमःहृदिवग लामुख्यैदेवतायैनमः गुह्येह्लींबीजायनमः पादयोःस्वाहाशक्तये नमः ॥ नारदोऽस्यऋषिर्म्मूर्ध्नित्रिष्टुप्छन्दश्चतन्मुखे ॥ श्रीबगला मुखीन्देवींहृदयेविन्यसेत्ततः ॥ ह्लींबीजङ्गुह्यदेशेतु स्वाहाशक्ति स्तुपादयोः ॥ ततरुकराङ्गन्यासौ ॥ ॐह्लींअङ्गुष्ठाभ्यान्नमः ब

गलामुखीतर्ज्जनीभ्यांस्वाहा सर्व्वदुष्टानाम्मध्यमाभ्याम्वँषट् वा चम्मुखंस्तम्भयअनामिकाभ्यांहूंम् जिह्वाङ्कीलयकीलयकनिष्ठाभ्याम्वौषट् बुद्धिन्नाशयह्रीँस्वाहाकरतलकरपृष्ठाभ्याम्फट् ॥ एवंहृदयादिषु ॥ तथाचदिव्यतन्त्रे ॥ युग्मबाणेषुसप्ताहिशेषाण्यैश्च मनूद्भवैः ॥ करशाखासुतलयोरकराङ्गन्यासमाचरेत् ॥ ततोमूलान्ते आत्मतत्त्वव्यापिनीवगलामुखीश्रीपादुकाम्पूजयामिइति मूलाधारे मूलान्तेविद्यातत्त्वव्यापिनीवगलामुखीश्रीपादुकाम्पूजयामिशिरसि मूलान्ते शिवतत्त्वव्यापिनीवगलामुखीश्रीपादुकाम्पूजयामिसर्व्वाङ्गे। ततश्च। मूर्ध्नि भाले दृशोः श्रोत्रे गण्डयोर्न्नासयोरपुनः ॥ ओष्ठयोर्म्मुखवृत्तेचदक्षिणांसेचकूर्प्परे ॥ मणिबन्धेऽङ्गुलेर्म्मूलेगलेचकुचयोर्हृदि ॥ नाभौकट्याङ्गुह्यदेशेवामांसेकूर्प्परेतथा ॥ मणिबन्धेऽङ्गुलेर्म्मूलेततश्चविन्यसेत्पुनः ॥ दक्षवामेचोरुजान्वोर्ग्गुल्फयोरङ्गुलिमूलयोः ॥ क्रमेणमन्त्रवर्णांस्तुन्यस्यध्यायेद्यथाविधि ॥ ततोध्यानम् ॥ मध्येसुराब्धिमणिमण्डपरत्नवेदीसिंहासनोपरिगताम्परिपीतवर्णाम् ॥ पीताम्बराभरणमाल्यविभूषिताङ्गीन्देवींस्मरामिधृतमुद्गरवैरिजिह्वाम् ॥ जिह्वाग्रमादायकरेणदेवीं वामेनशत्रून्परिपीडयन्तीम् ॥ गदाभिघातेनचदक्षिणेनपीताम्बराढ्यान्द्विभुजान्नमामि ॥ एवन्ध्यात्वामानसैः सम्पूज्य बहिरपूजामारभेत् ॥ तत्रप्रथमतोऽर्घ्यस्थापनम् ॥ यथा। अष्टाङ्गुलञ्चतुरस्रँव्विधायऐशानादिकोणेषु पूर्व्वादिदिक्षुचकुसुमाक्षतरक्तचन्दनैर्ग्लौंगणपतयेनम इत्यनेनगजवदनंसम्पूज्यतेनमधुनावाअर्घ्यपात्रमापूरयेत्। ततोवारत्रयंविद्ययासम्पूज्यअङ्गानिविन्यसेत्। ततोधेनुयोनिमुद्रेप्रदर्श्यतेनोदकेन आत्मानम्पूजोपकरणञ्चाभ्युक्षयेत्। ततोमूलमुच्चार्य्य ॐआधारशक्तिकमलासनायनमः। एवंशक्तिपद्मासनायनमः

पूर्व्ववद्ध्यात्वापीठे आवाह्यषडङ्गानिन्यसेत् । ततोमुद्राम्प्रदर्श्य पुरतःषडङ्गेनमण्डलंय्यजेत् । ततोमूलेनमन्त्रायित्वाधेनुयोनिमुद्रेप्रदर्श्य आत्मविद्याशिवैस्तत्त्वैर्ब्बिन्दुत्रयम्मुखेक्षिप्त्वातर्ज्जन्यङ्गुष्ठयोगेनसाङ्गावरणाम्वगलामुखीन्तर्प्पयेत् । ततोयथासम्भवोपचारैःसम्पूज्यआवरणपूजामारभेत् । षट्कोणेषुपूर्व्वे ॐ सुभगायैनमः एवमग्निकोणेभगसर्प्पिण्यै० ईशानेभगवाहायै० पश्चिमेभगसिद्धायै० नैर्ऋत्येभगपातिन्यै० वायौभगमालिन्यै० । ततोऽष्टदलपत्रेषुब्राह्म्याद्याःपूज्याः । पत्राग्रेषुॐजयायैनमः एवंविजयायै० अजितायै० अपराजितायै० स्तम्भिन्यै० जम्भिन्यै० मोहिन्यै० आकर्षिण्यै० । ततोद्वारेषुॐभैरवायनमः तद्बाह्येइन्द्रादींन्वज्रादीन्पूजयेत् ॥ ततोमूलेनधूपादिकन्दत्वा यथाशक्तिजपंविधायत्रिशूलमुद्राम्प्रदर्श्यपुष्पाञ्जलित्रयन्दत्वा देव्यैयोनिमुद्राम्प्रदर्शयेत् । ततोभैरवायबलिन्दद्यात् । ततोविसर्ज्जनान्तङ्कर्म्मसमापयेत् । अस्यपुरश्चरणंलक्षजपः । तथाच । पीताम्बरधरोभूत्वापूर्व्वाशाभिमुखस्थितः ॥ लक्षमेकञ्जपेन्मन्त्रं हरिद्राग्रन्थिमालया ॥ ब्रह्मचर्य्यरतोनित्यम्प्रयतोध्यानतत्परः ॥ प्रियङ्गुकुसुमेनापिपीतपुष्पैश्चहोमयेत् ॥

अथस्तोत्रम् ।

ॐअस्यश्रीबगलामुखीस्तोत्रस्यनारदऋषिः श्रीबगलामुखी देवता ममसन्निहितानाँव्विरोधिनाँव्वाङ्मुखपदबुद्धीनांस्तम्भनार्त्थेविनियोगः ॥ मध्येसुधाब्धिमणिमण्डपरत्नवेदीसिंहासनोपरिगताम्परिपीतवर्ण्णाम् ॥ पीताम्बराभरणमाल्यविभूषिताङ्गीं देवीम्भजामिधृतमुद्गरवैरिजिह्वाम् ॥ १ ॥ जिह्वाग्रमादायकरेणदेवीव्वामेनशत्रून्परिपीडयन्तीम् ॥ गदाभिघातेनचदक्षिणेनपीताम्बराढ्याद्विभुजाम्भजामि ॥ २ ॥ चलत्कनककुण्डलोल्लसित

चारुगण्डस्थलाँल्लसत्कनकचम्पकद्युतिमदिन्दुविम्वाननाम् ॥
गदाहतविपक्षकाङ्कलितलोलजिह्वाञ्चलां स्मरामिबगलामुखीं
विमुखवाङ्मनस्स्तम्भिनीम् ॥ ३ ॥ पीयूषोदधिमध्यचारु
विलसद्रत्नोत्पलेमण्डपेसत्सिंहासनमौलिपातितरिपुम्प्रेतासना
ध्यासिनीम् ॥ स्वर्णाभाङ्गरपीडितारिरसनाम्भ्राम्यद्गदाँव्विभ्रमा
मित्थन्ध्यायतियान्तितस्यविलयंसद्योऽथसर्व्वापदः ॥ ४ ॥
देवित्वच्चरणाम्बुजार्च्चनकृतेयःपीतपुष्पाञ्जलीन्भक्त्यावामकरे
निधायचमनुम्मन्त्रीमनोज्ञाक्षरम् ॥ पीठन्ध्यानपरोऽथकुम्भकव
शाद्बीजं स्मरत्पार्थिवस्तस्यामित्रमुखस्य वाचिहृदयेजाड्यम्भ
वेत्तत्क्षणात् ॥ ५ ॥ वादीमूकतिरङ्कतिक्षितिपतिर्व्वैश्वानरःशीत
तिक्रोधीशाम्यतिदुर्ज्जनःसुजनतिक्षिप्रानुगःखञ्जति ॥ गर्व्वीख
र्व्वतिसर्व्वविच्चजडतित्वद्यन्त्रणायन्त्रितः श्रीनित्येबगलामुखिप्र
तिदिनङ्कल्याणितुभ्यन्नमः ॥ ६ ॥ मन्त्रस्तावदलँव्विपक्षद
लनँस्तोत्रम्पवित्रञ्चते यन्त्रव्वँादिनियन्त्रणन्त्रिजगताञ्चैत्रञ्चचि
त्रञ्चते ॥ मातः श्रीबगलेतिनामललितंयस्यास्तिजन्तोर्म्मुखेत्व
न्नामग्रहणेनसंसदिमुखस्तम्भोभवेद्वादिनाम् ॥ ७ ॥ दुष्टस्तम्भ
नमुग्रविघ्नशमनन्दारिद्र्यविद्रावणं भूभृद्भीशमनञ्चलामृगदृशाञ्चे
तस्समाकर्षणम् ॥ सौभाग्यैकनिकेतनंसमदृशःकारुण्यपूर्णा
मृतम्मृत्योर्म्मारणमाविरस्तुपुरतोमातस्त्वदीयव्वँपुः ॥ ८ ॥ मा
तर्भञ्जयमेविपक्षवदनञ्जिह्वाञ्चसङ्कीलय ब्राह्मीम्मुद्रयनाशयाशु
धिषणामुग्राङ्गतिंस्तम्भय ॥ शत्रूंश्चूर्णयदेवितीक्ष्णगदयागौरा
ङ्गिपीताम्बरे विघ्नौघम्बगलेहरप्रणमताङ्कारुण्यपूर्णेक्षणे ॥ ९ ॥
मातर्भैरविभद्रकालिविजयेवाराहिविश्वाश्रये श्रीविद्येसमयेमहे
शिबगलेकामेशिरामेरमे ॥ मातङ्गित्रिपुरेपरात्परतरे स्वर्ग्गापव
र्ग्गप्रदे दासोऽहंशरणागतःकरुणयाविश्वेश्वरित्राहिमाम् ॥ १० ॥

संरम्भेचौरसङ्घेप्रहरणसमयेबन्धनेवारिमध्ये विद्यावादेविवादे प्रकुपितनृपतौदिव्यकालेनिशायाम् ॥ वश्येवास्तम्भनेवारिपु वधसमयेनिर्ज्जनेवावनेवा गच्छंस्तिष्ठंस्त्रिकालंयँ्यदिपठतिशिव म्प्राप्नुयादाशुधीरः ॥११॥ नित्यंस्तोत्रमिदम्पवित्रमिहयोदेव्याः पठत्यादराद्धृत्वायन्त्रमिदन्तथैवसमरेबाहौकरेवागले ॥ राजानो प्यरयोमदान्धकरिणस्सर्प्पामृगेन्द्रादिकास्तेवैयान्तिविमोहिता रिपुगणालक्ष्मीःस्थिरास्सिद्धयः ॥ १२ ॥ त्वँव्विद्यापरमात्रिलो कजननी विघ्नौघसञ्छेदिनी योषाकर्ष्षणकारिणीत्रिजगतामान न्दसँव्वर्द्धिनी ॥ दुष्टोच्चाटनकारिणी जनमनस्सम्मोहसन्दायि नी जिह्वाकीलनभैरवीविजयतेब्रह्मादिमन्त्रोयथा ॥ १३ ॥ वि द्यालक्ष्मीस्सर्व्वसौभाग्यमायुः पुत्रैः पौत्रैःसर्व्वसाम्राज्यसिद्धिः॥ मानम्भोगावश्यमारोग्यसौख्यम्प्राप्तन्तत्तद्भूतलेऽस्मिन्नरेण ॥ ॥ १४ ॥ यत्कृतञ्जपसन्नाहङ्गदितम्परमेश्वरि ॥ दुष्टानांनिग्रहा र्त्थायतद्गृहाणनमोऽस्तुते ॥ १५ ॥ ब्रह्मास्त्रमितिविख्यातन्त्रि षुलोकेषुविश्रुतम् ॥ गुरुभक्तायदातव्यन्नदेयंयँ्यस्यकस्यचित् ॥ ॥ १६ ॥ पीताम्बरान्द्विभुजाञ्चत्रिनेत्राङ्गात्रकोज्ज्वलाम् ॥शिला मुद्गरहस्ताञ्चस्मरेत्ताम्बगलामुखीम् ॥ १७ ॥ इतिरुद्रयामले बगलामुखीस्तोत्रंसमाप्तम् ॥

अथकवचम् ।

कैलासाचलमध्यगम्पुरवहं शान्तन्त्रिनेत्रंशिवं वामस्थाक वचम्प्रणम्यगिरिजाभूतिप्रदम्पृच्छति ॥ देवीश्रीबगलामुखी रिपुकुलारण्याग्निरूपाचया तस्याश्चापविमुक्तमन्त्रसहितम्प्री त्याधुनाब्रूहिमाम् ॥ १ ॥ श्रीशङ्करउवाच ॥ देवीश्रीभवव ल्लभेशृणुमहामन्त्रँव्विभूतिप्रदन्देव्यावर्म्मयुतं समस्तसुखदंसाम्रा

ज्यदम्मुक्तिदम् ॥ तारंरुद्रवधूँब्विरञ्चिमहिलाविष्णुप्रियाकाम युक्कान्तेश्रीबगलाननेममरिपुन्नाशाययुग्मन्त्विति ॥२॥ ऐश्वर्य्या णिपदञ्चेदेहियुगलंशीघ्रम्मनोवाञ्छितङ्कार्य्यंसाधययुग्मयुक्छि ववधूवह्निप्रियान्तो मनुः ॥ कंसारेस्तनयञ्च बीजमपराशक्ति श्चवाणीतथा कीलंश्रीभतिभैरवर्ष्पिसहितञ्छन्दोविराट्सय्युत म् ॥३॥ स्वेष्टार्त्थस्यपरस्यवेत्तिनितराङ्कार्य्यस्यसम्प्राप्तये नाना साध्यमहागदस्यनियतन्नाशायवीर्य्याप्तये ॥ ध्यात्वाश्रीबगलान नाम्मनुवरञ्जप्त्वासहस्राख्यकन्दीर्घैःपट्कयुतैश्चरुद्रमहिलाबीजै र्व्विनश्याङ्गके॥ ध्यानम् ॥ सौवर्ण्णासनसंस्थितान्त्रिनयनाम्पी तांशुकोल्लासिनीं हेमाभाङ्गरुचिंशशाङ्कमुकुटांसत्कृचम्पकस्रग्यु ताम् ॥ हस्तैर्म्मुद्गरपाशवद्धरसनां सम्बिभ्रतीम्भूषणव्याप्ता ङ्गीम्बगलामुखीन्त्रिजगतांसंस्तम्भिनीञ्चिन्तये ॥ ॐअस्यश्री बगलामुखीब्रह्मास्त्रमन्त्रकवचस्यभैरवऋषिर्व्विराट्छंन्दः श्रीबग लामुखीदेवताक्लींबीजम्ऐंशक्तिःश्रींकीलकंममपरस्यचमनोभिल षितेष्टकार्य्यसिद्धयेविनियोगः ॥ शिरसिभैरवऋषयेनमः मुखे विराट्छन्दसेनमः हृदिबगलामुखीदेवतायैनमः गुह्ये क्लींबीजाय नमः पादयोःऐंशक्तयेनमः सर्व्वाङ्गेश्रींकीलकायनमः ॐह्रांअङ्गु ष्टाभ्यान्नमः ॐह्रींतर्ज्जनीभ्यान्नमः ॐह्रूंमध्यमाभ्यान्नमः ॐह्रैं अनामिकाभ्यान्नमः ॐह्रौंकनिष्ठिकाभ्यान्नमः ॐह्रः करतलक करपृष्ठाभ्यान्नमः ॐह्रांहृदयायनमः ॐह्रींशिरसेस्वाहा ॥ ॐह्रूं शिखायैवषट् ॐह्रैंकवचायहूम् ॐह्रौंनेत्रत्रयायवौषट् ॐह्रः अ स्त्रायफट्॥मन्त्रोद्धारः ॥ ॐह्रांऐंश्रींक्लींश्रीबगलाननेममरिपून्नाश य २ ममैश्वर्य्याणिदेहि २ शीघ्रम्मनोवाञ्छितकार्य्यंसाधय २ ह्रींस्वाहा ॥ शिरोमेपातुॐह्रींऐंश्रींक्लींपातुललाटकम् ॥ स म्बोधनपदम्पातुनेत्रेश्रीबगलानने ॥१॥ श्रुतौममरिपुम्पातुनासि

कान्नाशयद्वयम् ॥ पातुगण्डौसदामामैश्वर्य्याण्यन्तन्तुमस्तकम् ॥२॥ देहिद्वन्द्वंसदाजिह्वाम्पातुशीघ्रंवचोमम॥कण्ठदेशंसनः पातुवाञ्छितम्बाहुमूलकम् ॥३॥ कार्य्यसाधयद्वन्द्वन्तुकरौपातुसदा मम॥मायायुक्तातथास्वाहाहृदयम्पातुसर्व्वदा ॥४॥ अष्टाधिकचत्वारिंशदण्डाढ्यावगलामुखी ॥ रक्षाङ्करोतुसर्व्वत्रगृहेरण्येसदाम म ॥५॥ ब्रह्मास्त्राख्योमनुः पातुसर्व्वाङ्गेसर्व्वसन्धिषु ॥ मन्त्रराजः सदारक्षाङ्करोतुममसर्व्वदा ।६॥ॐह्रींपातुनाभिदेशङ्कटिम्मेबगलावतु॥मुखीवर्ण्णद्वयम्पातुलिङ्गम्मेमुष्कयुग्मकम् ।७। जानुनीसर्व्वदुष्टानाम्पातुमेवर्ण्णपञ्चकम् ॥ वाचम्मुखन्तथापादंषड्वर्ण्णापरमेश्वरी ॥ ८॥ जङ्घायुग्मेसदापातुवगलारिपुमोहिनी ॥ स्तम्भयेति पदम्पृष्ठम्पातुवर्ण्णत्रयम्मम ॥९॥जिह्वाव्वँर्ण्णद्वयम्पातुगुल्फौमेकीलयेतिच ॥ पादोर्द्ध्वंसर्व्वदापातुबुद्धिंपादतलेमम॥१०॥विनाशय पदम्पातुपादाङ्गुल्योर्न्नखानिमे ॥ ह्रींवीजंसर्व्वदापातुबुद्धीन्द्रियवचांसिमे॥११॥सर्व्वाङ्गम्प्रणवः पातुस्वाहारोमाणिमेवतु॥ ब्राह्मीपूर्व्वदलेपातुचाग्नेय्याँविष्णुवल्लभा।१२।माहेशीदक्षिणेपातुचामुण्डाराक्षसेवतु ॥ कौमारीपश्चिमेपातुवायव्येचापराजिता॥१३॥ वाराहीचोत्तरेपातुनारसिंहीशिवेऽवतु॥ ऊर्द्ध्वम्पातुमहालक्ष्मीः पातालेशारदाऽवतु ॥१४॥ इत्यष्टौशक्तयः पान्तुसायुधाश्चसवाहनाः॥राजद्वारेमहादुर्गेपातुमाङ्गणनायकः।१५।श्मशानेजलमध्येचभैरवश्चसदावतु॥द्विभुजारक्तवसनाःसर्व्वाभरणभूषिताः ॥१६॥ योगिन्यःसर्व्वदापान्तुमहारण्येसदामम ॥ इतितेकथितन्देवि कवचम्परमाद्भुतम्॥१७॥ श्रीविश्वविजयन्नामकीर्त्तिश्रीविजयप्रदम् ॥ अणुत्रोलभतेपुत्रन्धीरंशूरंशतायुषम् ॥१८॥ निर्द्धनोधनमाप्नोतिकवचस्यास्यपाठतः॥जपित्वामन्त्रराजन्तुध्यात्वाश्रीबगलामुखीम् ॥ ।१९।पठेदिदंहिकवचन्निशायान्नियमात्तुयः॥यद्यत्कामयतेकामंसा

ध्यासाध्येमहीतले॥२०॥तत्तत्वकाममवाप्नोतिसप्तरात्रेणशङ्करि॥ गुरुन्ध्यात्वासुराम्पीत्वारात्रौशक्तिसमन्वितः ॥२१॥ कवचय्यँ पठेद्देवितस्याऽसाध्यन्नकिञ्चन॥ यन्ध्यात्वाप्रजपेन्मन्त्रसहस्रङ्कव चम्पठेत् ॥२२॥ त्रिरात्रेणवशय्यँातिमृत्युन्तन्नात्रसंशयः ॥ लिखि त्वाप्रतिमांशत्रोस्सतालेनहरिद्रया ॥२३ ॥ लिखित्वाहृदितन्नाम तन्ध्यात्वाप्रजपेन्मनुम् ॥एकविंशदिनय्यँावत्प्रत्यहञ्चसहस्रकम्॥ ॥२४॥ जप्त्वापठेत्तुकवचञ्चतुर्व्विंशतिवारकम् ॥ संस्तम्भजायते शत्रोर्न्नात्रकार्य्याविचारणा ॥ २५ ॥ विवादेविजयन्तस्यसङ्ग्रामे जयमाप्नुयात् ॥ श्मशानेचभयन्नास्तिकवचस्यप्रभावतः॥ २६ ॥ नवनीतञ्चाभिमन्त्र्यस्त्रीणान्दद्यान्महेश्वरि॥ वन्ध्यायाञ्जायतेपुत्रो विद्याबलसमन्वितः ॥२७॥ श्मशानाङ्गारमादाय भौमेरात्रौशना वथ ॥ पादोदकेनस्पृष्ट्वाचलिखेल्लौहशलाकया ॥२८॥ भूमौशत्रोः स्वरूपञ्चहृदिनामसमालिखेत्॥ हस्तन्तद्धृदयेदत्वाकवचन्तिथि वारकम् ॥२९॥ ध्यात्वाजपेन्मन्त्रराजन्नवरात्रम्प्रयत्नतः ॥ म्रिय तेज्वरदाहेनदशमेऽह्निनसंशयः ॥ ३० ॥ भूर्ज्जपत्रेष्विदंस्तोत्रमष्ट गन्धेनसँल्लिखेत् ॥ धारयेद्दक्षिणेबाहौनारीवामभुजेतथा ॥३१ ॥ सङ्ग्रामेजयमाप्नोतिनारीपुत्रवतीभवेत् ॥ ब्रह्मास्त्रादीनिशस्त्राणिनै वकृन्तन्तितत्तनम् ॥ ३२ ॥ सम्पूज्यकवचन्नित्यम्पूजायाःफल मालभेत् ॥ बृहस्पतिसमोवापिविभवेधनदोपमः ॥ ३३ ॥ कामतुल्यश्चनारीणांशत्रूणाञ्चयमोपमः ॥ कवितालहरीतस्यभवे द्गङ्गाप्रवाहवत् ॥ ३४ ॥ गद्यपद्यमयीवाणीभवेद्देवीप्रसादतः ॥ एकादशशतय्यँावत्पुरश्चरणमुच्यते ॥३५ ॥ पुरश्चर्य्याविहीनन्तु नचेदम्फलदायकम् ॥ नदेयम्परशिष्येभ्योदुष्टेभ्यश्चविशेषतः३६ देयंशिष्यायभक्तायपञ्चत्वञ्चान्यथाप्नुयात् ॥ इदङ्कवचमज्ञात्वाभ जेद्योवगलामुखीम् ॥ शतकोटिजपित्वातुतस्यसिद्धिर्न्नजायते

॥ ३७॥ दाराढ्योमनुजोस्यलक्षजपतः प्राप्नोतिसिद्धिम्पराँव्विद्यां श्रीविजयन्तथासुनियतन्धारश्चवीरव्वँरम् ॥ ब्रह्मास्त्राख्यमनुँव्वि लिख्यनितराम्भूर्ज्जेष्टगन्धेनवै धृत्वाराजपुरव्वँव्रजन्तिखलुयेदा सोऽस्तितेषान्नृपः ॥ ३८ ॥ इतिविश्वसारोद्धारतन्त्रेपार्व्वतीश्वरस व्वँवादेबगलामुखीकवचंसम्पूर्णम् ॥

अथ हृदयम् ।

ॐअस्यश्रीबगलामुखीहृदयमालामन्त्रस्यनारदऋषिरनुष्टुप्छ न्दश्श्रीवगलामुखीदेवता ह्रींवींजम् क्लींशक्तिः ऐंकींलकम् श्रीव गलामुखीप्रसादसिद्ध्यर्त्थेजपेविनियोगः ॥ अथन्यासः॥ॐनार दऋषयेनमश्शिरसिॐअनुष्टुप्छन्दसेनमोमुखे ॐश्रीवगलामुख्यै देवतायैनमोहृदये ॐह्रींवीजायनमोगुह्येॐक्लींशक्तयेनमःपाद योःॐऐंकीलकायनमस्सर्वाङ्गे ।अथकराङ्गन्यासौ॥ॐह्रींअङ्गुष्टा भ्यान्नमःॐक्लींतर्ज्जनीभ्यान्नमः ॐऐंमध्यमाभ्यान्नमः ॐह्रींअ नामिकाभ्यान्नमः ॥ ॐक्लींकनिष्ठिकाभ्यान्नमः ॐऐंकरतलकरपृ ष्ठाभ्यान्नमः ॥ ॐह्रींहृदयायनमः ॐक्लींशिरसेस्वाहा ॐऐंशि खायैवषट्।ॐह्रींकवचायहूम् ॐक्लींनेत्रत्रयायवौषट् ॐऐंअस्त्राय फट् ॐह्रींक्लींऐं इतिदिग्बन्धः ॥ पीताम्बराम्पीतमाल्यां पी ताभरणभूषिताम् ॥ पीतकञ्जपदद्वन्द्वाम्बगलाञ्चिन्तयेऽनिशम् इतिध्यात्वासम्पूज्य ॥ पीतशङ्खगदाहस्ते पीतचन्दनचर्च्चिते॥ बगलेमेवरन्देहि शत्रुसङ्घविदारिणि ॥ इतिसम्प्रार्थ्य ॥ ॐ ह्रींक्लींऐंवगलामुख्यैगदाधारिण्यैप्रेतासनाध्यासिन्यैस्वाहा ॥ इति मन्त्रञ्जपित्वापुनःपूर्ववद्धृदयादिषडङ्गन्यासङ्कृत्वास्तोत्रम्पठेत् ॥ तद्यथा ॥ वन्देहम्बगलान्देवीम्पीतभूषणभूषिताम् ॥ तेजो रूपमयीन्देवीम्पीततेजस्स्वरूपिणीम् ॥ १ ॥ गदाश्रमणभिन्ना भ्राम्भ्रुकुटीभीषणाननाम् ॥ भीषयन्तीम्भीमशत्रून्भजेभक्तस्यभ

व्यदाम् ॥ २ ॥ पूर्णचन्द्रसमानास्याम्पीतगन्धानुलेपनाम् ॥ पीताम्बरपरीधानाम्पवित्रामाश्रयाम्यहम् ॥ ३ ॥ पालयन्तीमनुप लम्प्रसमीक्ष्यावनीतले ॥ पीताचाररताम्भक्तांस्ताम्भवानीम्भ जाम्यहम् ॥ ४ ॥ पीतपद्मपदद्वन्द्वाञ्चम्पकारण्यरोपिणीम् ॥ पी तावतंसाम्परमाँव्वन्देपद्मजवन्दिताम् ॥ ५ ॥ लसच्चारुसिञ्जत्सु मञ्जीरपादाञ्चलत्स्वर्ण्णकर्ण्णावतंसाञ्चितास्याम् ॥ वलत्पीत चन्द्राननाञ्चन्द्रवन्द्याम्भजेपद्मजादीड्यसत्पादपद्माम् ॥ ६ ॥ सुपीताभयामालयापूतमन्त्रम्परन्तेजपन्तोजयंसँल्लभन्ते ॥ रणे रागरोषाद्भुतानां रिपूणाँव्विवादेबलाद्वैरकृद्धातमातः ॥ ७ ॥ भरत्पीतभास्वत्प्रभाहस्कराभाङ्गदागञ्जितामित्रगर्व्वांगरिष्टाम् ॥ गरीयो गुणागारगात्राङ्गुणाढ्याङ्गणेशादिगम्यां श्रये निर्गुणा ढ्याम् ॥ ८ ॥ जनायेजपन्त्युग्रबीजञ्जगत्सु परम्प्रत्यहन्तेस्मर न्तःस्वरूपम् ॥ भवेद्वादिनाँव्वाङ्मुखस्तम्भआद्येजयोजायतेज ल्पतामाशुतेषाम् ॥ ९ ॥ तवध्याननिष्ठाप्रतिष्ठात्मप्रज्ञाव ताम्पादपद्मार्च्चनेप्रेमयुक्ताः ॥ प्रसन्नानृपाःप्राकृताःपण्डितावा पुराणादिगादासतुल्याभवन्ति ॥ १० ॥ नमामस्तेमातः कनककमनीयांघ्रिजलजव्वँलद्विद्युद्वर्ण्णञ्जनतिमिरविध्वंसकरण म् ॥ भवाब्धौमग्नात्मोत्तरणकरणंसर्व्वशरणम्प्रपन्नानाम्मातर्ज्जग तिवगलेदुःखदमनम् ॥ ११ ॥ ज्वलज्ज्योत्स्नारत्नाकरमणि विषक्ताङ्क्यभवनं स्मरामस्तेधामस्मरहरहरीन्द्रेन्दुप्रमुखैः ॥ अहोरात्रम्प्रातःप्रणयनवनीयंसुविशदं परम्पीताकारम्परिचि तमणिद्वीपवसनम् ॥ १२ ॥ वदामस्तेमातश्श्रुतिसुखकर न्नामललितँल्लसन्मात्रावर्ण्णाञ्जगतिवगलेतिप्रचारितम् ॥ चल न्तस्तिष्ठन्तोवयमुपविशन्तोपिशयने नभेमोयच्छ्रेयोदिविदुरव लभ्यन्दिविषदाम् ॥ १३ ॥ पदार्च्चायाम्प्रीतिःप्रतिदिनमपूर्व्वा

प्रभवतु यथातेप्रासन्यम्प्रतिपलमपेक्ष्यम्प्रणमताम् ॥ अनल्प न्तन्मातर्म्भवतिभृतभक्त्याभवतुनो दिशातस्सद्भक्तिम्भुविभगव ताम्भूरिभवदाम् ॥ १४ ॥ मम सकलरिपूणाव्वाङ्मुखेस्तम्भया शु भगवतिरिपुजिह्वाङ्कीलयप्रस्थतुल्याम् ॥ व्यवसितखलबुद्धि न्नाशयाशुप्रगल्भां ममकुरुवहुकार्य्यसत्कृपेऽम्बप्रसीद ॥ १५ ॥ व्रजतुममरिपूणांसद्मनिप्रेतसँस्था करधृतगदयातान्घातयित्वा शुरोषात् ॥ सधनवसनधान्यंसद्मतेषाम्प्रदह्य पुनरपिबगला स्वस्थानमायातुशीघ्रम् ॥ १६ ॥ करधृतरिपुजिह्वापीडनव्य ग्रहस्ताम्पुनरपिगदयातांस्ताडयन्तींसुतन्त्राम् ॥ प्रणतसुरग णानाम्पालिकाम्पीतवस्त्रां वहुवलबगलान्ताम्पीतवस्त्रान्नमामः ॥ १७ ॥ हृदयवचनकायैरकुर्वताम्भक्तिपुञ्जम्प्रकटतिकरुणा द्रौम्प्रीणतीजल्पतीति ॥ धनमथबहुधान्यम्पुत्रपौत्रादिवृद्धिः सकलमपिकिमेभ्योदेयमेवन्त्ववश्यम् ॥ १८ ॥ तवचरणसरोजं सर्व्वदासेव्यमानन्द्रुहिणहरिहराद्यैर्देववृन्दैश्शरण्यम् ॥ मृदुम पिशरणन्तेशर्म्मदंसूरिसेव्यँव्ययमिहकरवामोमातरेतद्विधेयम् ॥ ॥ १९ ॥ बगलाहृदयस्तोत्रमिदम्भक्तिसमन्वितः ॥ पठेद्यो बगलातस्यप्रसन्नापाठतोभवेत् ॥ २० ॥ पीतध्यानपरोभक्तोय श्शृणोत्यविकल्पतः ॥ निष्कल्मषो भवेन्मर्त्त्योमृतोमोक्षमवाप्नु यात्॥२१॥आश्विनस्यसितेपक्षेमहाष्टम्यान्दिवानिशम्॥ यस्त्विद म्पठतेप्रेम्णाबगलाप्रीतिमेतिसः ॥ २२ ॥ देव्यालयेपठन्मर्त्त्यो बगलान्ध्यायतीश्वरीम् ॥ पीतवस्त्रावृतोयस्तुतस्यनश्यन्तिशत्रवः ॥ २३ ॥ पीताचाररतोनित्यम्पीतभूषाँश्चिन्तयन् ॥ बग लाँय्यपठेन्नित्यंहृदयस्तोत्रमुत्तमम् ॥ २४ ॥ नाकिञ्चिदुर्ल्लभ न्तस्यदृश्यतेजगतीतले ॥ शत्रवोग्लानिमायान्तितस्यदर्शन

मात्रतः ॥ २९ ॥ इतिसिद्धेश्वरतन्त्रे उत्तरखण्डेबगलापटले श्रीबगलाहृदयस्तोत्रंसमाप्तम् ॥

अथशतनाम।

नारदउवाच ॥ भगवन्देवदेवेशसृष्टिस्थितिलयात्मक ॥ शतमष्टोत्तरन्नाम्नाम्बगलायावदाधुना ॥ १ ॥ श्रीभगवानुवाच ॥ शृणुवत्सप्रवक्ष्यामिनाम्नामष्टोत्तरंशतम् ॥ पीताम्बर्य्यामहादेव्याः स्तोत्रम्पापप्रणाशनम् ॥ २ ॥ यस्यप्रपठनात्सद्योवादीमूकोभवेत्क्षणात् ॥ रिपूणांस्तम्भनंय्यातिसत्यंसत्यंब्रवीम्यहम् ॥ ३ ॥ ॐअस्यश्रीपीताम्बर्य्यष्टोत्तरशतनामस्तोत्रस्यसदाशिवऋषिर नुष्टुप्छन्दश्श्रीपीताम्बरीदेवता श्रीपीताम्बरीप्रीतये जपेविनियोगः ॥ ॐ वगलाविष्णुवनिताविष्णुशङ्करभामिनी ॥ बहुलावेदमाताचमहाविष्णुप्रसूरपि ॥ १ ॥ महामत्स्यामहाकूर्म्मा महावाराहरूपिणी ॥ नरसिंहप्रियारम्यावामनाबटुरूपिणी ॥ ॥ २ ॥ जामदग्न्यस्वरूपाचरामारामप्रपूजिता ॥ कृष्णाकपर्दिनीकृत्याकलहाकलविकारिणी ॥ ३ ॥ बुद्धिरूपाबुद्धभार्य्याबौद्धपाखण्डखण्डिनी ॥ कल्किरूपाकलिहराकलिदुर्ग्गतिनाशिनी ॥ ४ ॥ कोटिसूर्य्यप्रतीकाशाकोटिकन्दर्प्पमोहिनी ॥ केवलाकठिनाकाली कलाकैवल्यदायिनी ॥ ५ ॥ केशवीकेशवाराध्याकिशोरीकेशवस्तुता ॥ रुद्ररूपारुद्रमूर्त्तीरुद्राणीरुद्रदेवता ॥ ॥ ६ ॥ नक्षत्ररूपानक्षत्रानक्षत्रेशप्रपूजिता ॥ नक्षत्रेशप्रियानित्यानक्षत्रपतिवन्दिता ॥ ७ ॥ नागिनीनागजननीनागराजप्रवन्दिता ॥ नागेश्वरीनागकन्यानागरीचनगात्मजा ॥ ८ ॥ नगाधिराजतनयानगराजप्रपूजिता ॥ नवीनानीरदापीताश्यामासौन्दर्य्यकारिणी ॥ ९ ॥ रक्तानीलाघनाशुभ्राश्वेतासौभाग्यदा

यिनी ॥ सुन्दरीसौभगासौम्यास्वर्ण्णभास्वर्ग्गतिप्रदा॥१०॥रिपु त्रासकरीरेखाशत्रुसंहारकारिणी ॥ भामिनीचतथामायास्तम्भि नीमोहिनीशुभा ॥ ११ ॥ रागद्वेषकरीरात्रीरौरवध्वंसकारिणी ॥ यक्षिणीसिद्धनिवहासिद्धेशासिद्धिरूपिणी ॥ १२ ॥ लङ्काप तिध्वंसकरीलङ्केशरिपुवन्दिता ॥ लङ्कानाथकुलहरा महारावण हारिणी ॥ १३ ॥ देवदानवसिद्धौघपूजितापरमेश्वरी ॥ परा णुरूपापरमापरतन्त्रविनाशिनी ॥ १४ ॥ वरदावरदाराध्यावर दानपरायणा ॥ वरदेशप्रियावीरावीरभूषणभूषिता ॥ १५ ॥ व सुदाबहुदावाणीब्रह्मरूपावरानना ॥ बलदापीतवसनापीतभूष णभूषिता ॥ १६ ॥ पीतपुष्पप्रियापीतहारा पीतस्वरूपिणी ॥ इतितेकथितँव्विप्रनाम्नामष्टोत्तरंशतम् ॥ १७ ॥ यःपठेत्पाठ येद्वापिशृणुयाद्वासमाहितः ॥ तस्यशत्रुःक्षयंसद्यो यातिनैवात्र संशयः ॥ १८ ॥ प्रभातकालेप्रयतोमनुष्यःपठेत्सुभक्त्यापरिचि न्त्यपीताम् ॥ द्रुतम्भवेत्तस्यसमस्तवृद्धिर्व्विनाशमायातिचत स्यशत्रुः ॥ १९ ॥ इतिविष्णुयामलेनारदविष्णुसंव्वादेश्रीवगला ष्टोत्तरशतनामस्तोत्रंसम्पूर्णम् ॥

अथसहस्रनाम ।

सुरालयप्रधानेतुदेवदेवम्महेश्वरम् ॥ शैलाधिराजतनयासङ्ग्र हेतमुवाचह ॥१॥ श्रीदेव्युवाच ॥ परमेष्ठिन्परन्धामप्रधानपरमे श्वर ॥ नाम्नांसहस्रम्बगलामुख्याद्याब्रूहिवल्लभ॥२॥ईश्वरउवाच ॥ शृणुदेविप्रवक्ष्यामिनामधेयसहस्रकम् ॥ परब्रह्मास्त्रविद्यायाश्चतु र्व्वर्ग्गफलप्रदम् ॥३॥ गुह्याद्गुह्यतरन्देविसर्व्वासिद्धैकवन्दितम्॥अ तिगुप्ततरँव्विद्यासर्व्वतन्त्रेषुगोपिता ॥४॥ विशेषतःकलियुगेमहा सिद्धचौघदायिनी ॥ गोपनीयङ्गोपनीयङ्गोपनीयम्प्रयत्नतः ॥५॥

अप्रकाश्यमिदं सत्यं स्वयोनिरिव सुव्रते ॥ रोधिनीविघ्नस ङ्घानांमोहिनीपरयोषिताम् ॥ ६ ॥ स्तम्भिनीराजसैन्यानाञ्चवादि नीपरवादिनाम् ॥ पुराचैकाण्णेवेघोरे कालेपरमभैरवः ॥ ७ ॥ सु न्दरीसहितोदेवꣳकेशवꣳक्लेशनाशनः ॥उरगासनमासीनोयोगनि द्रामुपागमत् ॥८॥ निद्राकालेचतेकालेमयाप्रोक्तꣳसनातनः ॥म हास्तम्भकरन्देविस्तोत्रञ्चवाशतनामकम् ॥ ९ ॥ सहस्रनामपर मञ्चददेवस्यकस्यचित् ॥ श्रीभगवानुवाच ॥ शृणुशङ्करदेवेशप रमातिरहस्यकम् ॥ १० ॥ अजोहंयत्प्रसादेनविष्णुःसर्व्वेश्वरेश्व रः ॥ गोपनीयम्प्रयत्नेनप्रकाशात्सिद्धिहानिकृत् ॥ ११ ॥ ओम स्यश्रीपीताम्बरीसहस्रनामस्तोत्रमन्त्रस्यभगवान्सदाशिवऋषिर नुष्टुप्छन्दश्श्रीजगद्वश्यकरी पीताम्बरीदेवता सर्व्वाभीष्टसिद्धच र्थेजपेविनियोगः ॥ अथध्यानम् ॥ पीताम्बरपरीधानांपीनोन्नत पयोधराम् ॥ जटामुकुटशोभाढ्याम्पीतभूमिसुखासनाम् ॥ ॥ १२ ॥ शत्रोर्जिह्वांमुद्गरञ्चबिभ्रतीम्परमाङ्कलाम् ॥ सर्व्वागम पुराणेषुविख्याताम्भुवनत्रये ॥ १३ ॥ सृष्टिस्थितिविनाशाना मादिभूताम्महेश्वरीम् ॥ गोप्यासर्व्वप्रयत्नेनशृणुताङ्कथयामिते ॥ १४ ॥ जगद्विध्वंसिनीन्देवीमजरामरकारिणीम् ॥ ताम्रमा मिमहामायाम्महदैश्वर्य्यदायिनीम् ॥ १५ ॥ प्रणवम्पूर्व्वमुद्ध त्यस्थिरमायान्ततोवदेत् ॥ वगलामुखीसर्व्वेतिदुष्टानाञ्चवाचमे वच ॥ १६ ॥ मुखम्पदंस्तम्भयेतिजिह्वाङ्कीलयबुद्धिमत् ॥ वि नाशयेतितारञ्चस्थिरमायान्ततोवदेत् ॥ १७ ॥ वह्निप्रियान्त तोमन्त्रश्चतुर्व्वर्ग्गफलप्रदः ॥ ब्रह्मास्त्रम्ब्रह्मविद्याचब्रह्ममातास नातनी ॥ १८ ॥ ब्रह्मेशीब्रह्मकैवल्यवगलाब्रह्मचारिणी ॥ नि त्यानन्दानित्यसिद्धानित्यरूपानिरामया ॥ १९ ॥ सन्धारिणी महामायाकटाक्षक्षेमकारिणी ॥ कमलाविमलानीलारत्नकान्तिगु

णाश्रिता ॥ २० ॥ कामप्रियाकामरताकामकामस्वरूपिणी ॥ म
ङ्गलाविजयाजायासर्व्वमङ्गलकारिणी ॥ २१ ॥ कामिनीकामि
नीकाम्याकामुकाकामचारिणी ॥ कामप्रियाकामरताकामाका
मस्वरूपिणी ॥ २२॥ कामाख्याकामबीजस्थाकामपीठनिवासि
नी॥कामदाकामहाकालीकपालीचकरालिका ॥२३॥कंसारिस
मलाकामाकैलासेश्वरवल्लभा ॥ कात्यायनीकेशवाचकरुणाकाम
केलिभुक् ॥२४॥ कियाकीर्त्तिस्कृत्तिकाचकाशिकामथुराशिवा॥
कालाक्षीकालिकाकालीधवलाननसुन्दरी ॥ २५ ॥ खेचरीच
खमूर्त्तिश्चक्षुद्राक्षुद्रक्षुधावरा ॥ खड्गहस्ताखड्गरताखड्गिनीखर्प्प
रप्रिया ॥ २६ ॥ गङ्गागौरीगामिनीचगीतागोत्रविवर्द्धिनी ॥ गो
धरागोकरागोधागन्धर्व्वपुरवासिनी ॥ २७ ॥ गन्धर्व्वागन्धर्व्वक
लागोपनीगरुडासना ॥ गोविन्दभावागोविन्दागान्धारीगन्धमा
दिनी ॥ २८ ॥ गौराङ्गीगोपिकामूर्त्तिर्ग्गोपीगोष्ठनिवासिनी ॥ ग
न्धागजेन्द्रगामान्यागदाधरप्रियाग्रहा ॥ २९ ॥ घोरघोराघोररू
पाघनश्रोणीघनप्रभा ॥ दैत्येन्द्रप्रबलाघण्टावादिनीघोरनिस्स्व
ना ॥३० ॥ डाकिन्युमाउपेन्द्राचउर्व्वशीउरगासना ॥ उत्तमाउन्न
ता उन्नाउत्तमस्थानवासिनी ॥ ३१ ॥ चामुण्डामुण्डिताचण्डी
चण्डदर्प्पहरेतिच ॥ उग्रचण्डाचण्डचण्डाचण्डदैत्यविनाशिनी
॥ ३२ ॥ चण्डरूपाप्रचण्डाचचण्डाचण्डशरीरिणी ॥ चतुर्भुजा
प्रचण्डाचचराचरनिवासिनी ॥ ३३ ॥ क्षत्रप्रायश्शिरोवाहाछ
लाछलतराछली ॥ क्षत्ररूपाक्षत्रधराक्षत्रियक्षयकारिणी ॥ ३४॥
जयचजयदुर्ग्गाचजयन्तीजयदापरा ॥ जायिनीजयिनीज्यो
त्स्नाजटाधरप्रियाजिता ॥ ३५ ॥ जितेन्द्रियाजितक्रोधाजयमा
नाजनेश्वरी ॥ जितमृत्युर्जरातीताजाह्नवीजनकात्मजा ॥ ३६ ॥
झङ्काराझञ्झराझण्टाझङ्कारीझकशोभिनी ॥ झखाझमेशाझङ्का

रीयोनिकल्याणदायिनी ॥३७॥झञ्झराझमुरीझाराझराझरतराप रा॥ झञ्झाझमेताझङ्कारीझणाकल्याणदायिनी ॥३८॥ ईमनामा नसीचिन्त्याईमुनाशङ्करप्रिया ॥ टङ्कारीटिटिकाटीकाटङ्किनी चटवर्ग्गगा ॥ ३९ ॥ टापाटोपाटटपतिष्टमनीटमनप्रिया ॥ ठ कारधारिणीठीकाठङ्करीठिकरप्रिया ॥ ४० ॥ ठेकठासाठकरती ठामिनीठमनप्रिया ॥ डारहाडाकिनीडाराडामराडमराप्रिया ॥ ४१ ॥ डखिनीडडयुक्ताचडमरूकरवल्लभा ॥ ढक्काढक्कीढक्क नादाढोलशब्दप्रबोधिनी ॥ ४२ ॥ ढामिनीढामनप्रीताढग तन्त्रप्रकाशिनी ॥ अनेकरूपिणीअम्बाअणिमासिद्धिदायिनी ॥ ४३ ॥ अमन्त्रिणीअणुकरी अणुमद्धानुसंस्थिता ॥ ता रातन्त्राधतीतन्त्रतत्त्वरूपातपस्विनी ॥ ४४ ॥ तरङ्गिणी तत्त्वपरातन्त्रिकातन्त्राविग्रहा ॥ तपोरूपातत्त्वदात्रीतपप्री तिप्रधर्ष्षिणी ॥ ४५ ॥ तन्त्रायन्त्रार्च्चनपरातलातलनिवा सिनी ॥ तल्पदात्वल्पदाकाम्या स्थिरास्थिरतरास्थितिः ॥ ॥ ४६ ॥ स्थाणुप्रियास्थपरास्थिलतास्थानप्रदायिनी ॥ दि गम्बरादयारूपादावाग्निदमनीदमा ॥ ४७ ॥ दुर्ग्गादुर्ग्गपरा देवीदुष्टदैत्यविनाशिनी ॥ दमनप्रमदादैत्यदयादानपरायणा ॥ ॥ ४८ ॥ दुर्ग्गार्त्तिनाशिनीदान्तादम्भिनीदम्भवर्ज्जिता ॥ दिगम्बरप्रियादम्भादैत्यदम्भविदारिणी ॥ ४९ ॥ दमनादशन सौदर्य्या दानवेंद्रविनाशिनी ॥ दयाधराचदमनीदर्ब्भपत्रवि लासिनी ॥ ५० ॥ धरिणीधारिणीधात्रीधराधरधरप्रिया ॥ ध राधरसुतादेवीसुधर्म्माधर्म्मचारिणी ॥ ५१ ॥ धर्म्मज्ञाधवला धूलाधनदाधनवर्द्धिनी ॥ धीराधीराधीरतराधीरसिद्धिप्रदायिनी ॥ ५२ ॥ धन्वन्तरिधराधीराध्येयाध्यानस्वरूपिणी ॥ नारा यणीनारसिंहीनित्यानन्दनरोत्तमा ॥ ५३ ॥ नक्तानक्तवतीनि

त्यानीलजीमूतसन्निभा ॥ नीलाङ्गीनीलवस्त्राचनीलपर्व्वतवासि नी ॥ ५४ ॥ सुनीलपुष्पखचितानीलजम्बुसमप्रभा ॥ नित्या ख्याषोडशीविद्यानित्यानित्यसुखावहा ॥ ५५ ॥ नर्म्मदानन्दना नन्दानन्दानन्दविवर्द्धिनी ॥ यशोदानन्दतनयानन्दनोद्यानवा सिनी ॥ ५६ ॥ नागान्तकानागवृद्धानागपत्नीचनागिनी ॥ न मिताशेषजनतानमस्कारवतीनमः ॥ ५७ ॥ पीताम्बरापार्व्व तीचपीताम्बरविभूषिता ॥ पीतमाल्याम्बरधरापीताभापिङ्ग मूर्द्धजा ॥ ५८ ॥ पीतपुष्पार्च्चनरतापीतपुष्पसमर्च्चिता ॥ पर प्रभापितृपतिःपरसैन्यविनाशिनी ॥ ५९ ॥ परमापरतन्त्राचप रमन्त्रापरात्परा ॥ पराविद्यापरासिद्धिःपरास्थानप्रदायिनी ॥ ॥ ६० ॥ पुष्पापुष्पवतीनित्यापुष्पमालाविभूषिता ॥ पुरात नापूर्व्वपरापरसिद्धिप्रदायिनी ॥ ६१ ॥ पीतानितम्बिनीपी तापीनोन्नतपयस्तनी ॥ प्रेमाप्रमध्यमाशेषापद्मपत्रविलासिनी ॥ ६२ ॥ पद्मावतीपद्मनेत्रा पद्मापद्ममुखीपरा ॥ पद्मासना पद्मप्रियापद्मरागस्वरूपिणी ॥ ६३ ॥ पावनीपालिकापात्री परदावरदाशिवा ॥ प्रेतसंस्थापरानन्दापरब्रह्मस्वरूपिणी ॥ ॥ ६४ ॥ जिनेश्वरप्रियादेवीपशुरक्तरतप्रिया ॥ पशुमांसप्रिया पर्ण्णापरामृतपरायणा ॥ ६५ ॥ पाशिनीपाशिकाचापिपशुघ्नी पशुभाषिणी ॥ फुल्लारविन्दवदनीफुल्लोत्पलशरीरिणी ॥ ६६ ॥ परानन्दप्रदावीणापशुपाशविनाशिनी ॥ फुत्काराफुत्परापेणी फुल्लेन्दीवरलोचना ॥ ६७ ॥ फट्मन्त्रास्फटिकास्वाहा स्फो टाचफट्स्वरूपिणी ॥ स्फाटिकाघुटिकाघोरास्फटिकाद्रिस्वरू पिणी ॥ ६८ ॥ वराङ्गनावरधरावाराहीवासुकीवरा ॥ बिन्दु स्थाबिन्दुनीवाणी बिन्दुचक्रनिवासिनी ॥ ६९ ॥ विद्याधरीवि शालाक्षीकाशीवासिजनप्रिया ॥ वेदविद्याविरूपाक्षी विश्वयु

ग्वहुरूपिणी ॥७०॥ ब्रह्मशक्तिर्व्विष्णुशक्तिःपञ्चवक्त्राशिवप्रिया ॥ वैकुण्ठवासिनीदेवीवैकुण्ठपददायिनी ॥ ७१ ॥ ब्रह्मरूपावि ष्णुरूपापरब्रह्ममहेश्वरी ॥ भवप्रियाभवोद्भावाभवरूपाभवोत्तमा ॥ ७२ ॥ भवपाराभवधाराभाग्यवत्प्रियकारिणी ॥ भद्रासुभद्रा भवदाशुम्भदैत्यविनाशिनी ॥ ७३ ॥ भवानीभैरवीभीमाभद्रका लीसुभद्रिका ॥ भगिनीभगरूपाचभगमानाभगोत्तमा ॥ ७४ ॥ भगप्रियाभगवतीभगवासाभगाकरा ॥ भगसृष्टाभाग्यवतीभग रूपाभगासिनी ॥ ७५ ॥ भगलिङ्गप्रियादेवीभगलिङ्गपरायणा॥ भगलिङ्गस्वरूपाचभगलिङ्गविनोदिनी ॥ ७६ ॥ भगलिङ्गर तादेवीभगलिङ्गनिवासिनी ॥ भगमालाभगकलाभगाधाराभगा म्बरा ॥ ७७ ॥ भगवेगाभगाभूषाभगेन्द्राभाग्यरूपिणी ॥भगलि ङ्गाङ्गसम्भोगाभगलिङ्गासवावहा॥ ७८॥ भगलिङ्गसमाधुर्य्याभ गलिङ्गनिवेशिता॥भगलिङ्गसुपूजाचभगलिङ्गसमन्विता ॥७९॥ भगलिङ्गविरक्ताचभगलिङ्गसमावृता॥ माधवीमाधवीमान्यामधु रामधुमानिनी ॥८०॥ मन्दहासामहामायामोहिनीमहदुत्तमा॥म हामोहामहाविद्यामहाघोरामहास्मृतिः ॥ ८१ ॥ मनस्विनी मानवतीमोदिनीमधुराननना ॥ मेनिकामानिनीमान्यामणिरत्न विभूषणा ॥ ८२ ॥ मल्लिकामौलिकामालामालाधरमदोत्तमा ॥ मदनासुन्दरीमेधामधुमत्तामधुप्रिया ॥ ८३ ॥ मत्तहंसासमोन्मा सामत्तसिंहमहासनी ॥ महेन्द्रवल्लभाभीमामौल्यश्वमिथुनात्मजा ॥ ८४ ॥ महाकाल्यामहाकालीमनाबुद्धिर्म्महोत्कटा ॥ माहेश्व रीमहामायामहिषासुरघातिनी ॥ ८५ ॥ मधुराकीर्त्तिमत्ताचम त्तमातङ्गगामिनी ॥ मदप्रियामांसरतामत्तथुक्कामकारिणी ॥ ॥ ८६ ॥ मैथुन्यवल्लभादेवीमहानन्दामहोत्सवा ॥ मरीचिर्म्मा रतिर्म्मायामनोबुद्धिप्रदायिनी ॥ ८७ ॥ मोहामोक्षामहालक्ष्मी

र्म्महत्पदप्रदायिनी॥ यमरूपाचयमुनाजयन्तीचजयप्रदा॥८८॥ याम्यायमवतीयुद्धायदोऽकुलविवर्द्धिनी ॥ रमारामारामपत्नीरत्न मालारतिप्रिया ॥ ८९॥ रत्नसिंहासनस्थाचरत्नाभरणमण्डिता॥ रमणीरमणीयाचरत्यारसपरायणा ॥ ९० ॥ रतानन्दारत वतीरघूणाङ्कुलवर्द्धिनी ॥ रमणारिपरिभ्राज्यारैधाराधिकरत्नजा ॥ ९१ ॥ रावीरसस्वरूपाचरात्रिराजसुखावहा ॥ ऋतुजाऋतु दाऋद्धाऋतुरूपाऋतुप्रिया ॥ ९२ ॥ रक्तप्रियारक्तवतीरङ्गिणी रक्तदन्तिका ॥ लक्ष्मीर्ल्लज्जालतिकाचलीलालग्नानिताक्षिणी ॥ ॥ ९३॥ लीलालीलावतीलोमाहर्ष्षाह्लादनपट्टिका ॥ ब्रह्मस्थिता ब्रह्मरूपाब्रह्मणावेदवन्दिता ॥ ९४ ॥ ब्रह्मोद्भवाब्रह्मकलाब्रह्मा णीब्रह्मबोधिनी ॥ वेदाङ्गनावेदरूपावनितावितनावसा ॥ ९५ ॥ बालाचयुवतीवृद्धाब्रह्मकर्म्मपरायणा ॥ विन्ध्यस्थाविन्ध्यवासी च बिन्दुयुग्बिन्दुभूषणा ॥ ९६ ॥ विद्यावतीवेदधारीव्यापि कावर्हिणीकला ॥ वामाचारप्रियावह्निर्व्वामाचारपरायणा ॥ ॥ ९७ ॥ वामाचाररतादेवीवामदेवप्रियोत्तमा ॥ बुद्धेन्द्रियाविबु द्धाचबुद्धाचरणमालिनी ॥ ९८ ॥ बन्धमोचनकर्त्रीचवारुणा वरुणालया ॥ शिवाशिवप्रियाशुद्धाशुद्धाङ्गीशुक्लवर्ण्णिका॥९९॥ शुक्लपुष्पप्रियाशुक्लाशिवधर्म्मपरायणा ॥ शुक्लस्थाशुक्लिनीशुक्लरू पशुक्लपशुप्रिया ॥ १०० ॥ शुक्लस्थाशुक्रिणीशुक्राशुक्ररूपाच शुक्रिका ॥ षण्मुखीचषडङ्गाच षट्चक्रविनिवासिनी ॥ १०१ ॥ षड्ग्रन्थियुक्तापोढाचषण्माताचषडात्मिका ॥ षडङ्गयुवतीदेवी षडङ्गप्रकृतिर्व्वशी ॥ १०२ ॥ षडाननाषड्रसाचषष्ठीपष्टेश्वरीप्रि या ॥ षड्वर्णादाषोडशीचषोढान्यासस्वरूपिणी ॥ १०३ ॥ ष ट्चक्रभेदनकरीषट्चक्रस्थस्वरूपिणी ॥ षोडशस्वररूपाचष ण्मुखीषड्दगन्विता ॥ १०४ ॥ सनकादिस्वरूपाचशिवधर्म्मपरा

यणा ॥ सिद्धासप्तस्वरीशुद्धासुरमातास्वरोत्तमा ॥ १०५ ॥ सिद्धविद्यासिद्धमातासिद्धासिद्धस्वरूपिणी ॥ हराहरिप्रियाहारा हरिणीहारयुक्तथा ॥ १०६ ॥ हरिरूपाहरिधाराहरिणाक्षीहरिप्रिया ॥ हेतुप्रियाहेतुरताहिताहितस्वरूपिणी ॥ १०७ ॥ क्षमाक्षमावतीक्षीताक्षुद्रघण्टाविभूषणा ॥ क्षयङ्करीक्षितीशाचक्षीणमध्यसुशोभना ॥ १०८ ॥ अजानन्ताअपर्ण्णाचअहल्याशेषशायिनी ॥ स्वान्तर्गताचसाधूनामन्तरानन्तरूपिणी ॥१०९॥ अरूपाअमलाचार्द्धाअनन्तगुणशालिनी॥स्वविद्याविद्यकाविद्याविद्याचार्व्विन्दलोचना॥११०॥अपराजिताजातवेदाअजपाअमरावती॥अल्पास्वल्पाअनल्पाद्याअणिमासिद्धिदायिनी॥१११॥ अष्टसिद्धिप्रदादेवीरूपलक्षणसय्युता॥अरविन्दमुखादेवीभोगसौख्यप्रदायिनी ॥ ११२ ॥ आदिविद्याआदिभूताआदिसिद्धिप्रदायिनी॥सीत्कारूपिणीदेवीसर्व्वासनविभूषिता।११३। इन्द्रप्रियाचइन्द्राणीइन्द्रप्रस्थनिवासिनी ॥ इन्द्राक्षीइन्द्रवन्द्राचइन्द्रमद्योक्षणीतथा ॥११४॥ ईलाकामनिवासाचईश्वरीश्वरवल्लभा ॥ जननीचेश्वरीदीनाभेदाचेश्वरकर्म्मकृत् ॥ ११५ ॥ उमाकात्यायनीऊर्द्धोमीनाचोत्तरवासिनी ॥ उमापतिप्रियादेवीशिवाचोङ्काररूपिणी ॥ ११६॥ उरगेन्द्रशिरोरत्नाउरगोरगवल्लभा ॥ उद्यानवासिनीमालाप्रशस्तमणिभूषणा ॥ ११७ ॥ ऊर्द्धदन्तोत्तमाङ्गीचउत्तमाचोर्ध्वकेशिनी ॥ उमासिद्धिप्रदायाचउरगासनसंस्थिता ॥ ॥११८॥ऋषिपुत्रीऋषिच्छन्दाऋद्धिसिद्धिप्रदायिनी॥ उत्सवोत्सवसीमन्ताकामिकाचगुणान्विता॥११९॥एलाएकारविद्याचएणीविद्याधरातथा ॥ ॐकारवलयोपेताॐकारपरमाकला ॥१२०॥ ॐवदवदवाणीचॐकाराक्षरमण्डिता ॥ ऐन्द्रीकुलिशहस्ताचॐलोकपरवासिनी॥१२१॥ ॐकारमध्यबीजाच ॐनमोरूपधारि

णी ॥ परब्रह्मस्वरूपाच अंशुकांशुकवल्लभा ॥१२२॥ ॐकाराअः फड्मन्त्राचअक्षाक्षरविभूषिता ॥ अमन्त्रामन्त्ररूपाचपदशोभा समन्विता ॥१२३॥ प्रणवोङ्काररूपाचप्रणवोच्चारभाक्पुनः ॥ ह्रींकाररूपाह्रीङ्कारीवाग्बीजाक्षरभूषणा ॥ १२४ ॥ हृल्लेखासिद्धि योगाचहृत्पद्मासनसँस्थिता॥बीजाख्यानेत्रहृदया ह्रीम्बीजाम्बुव नेश्वरी ॥ १२५ ॥ क्लींकामराजाक्लिन्नाचचतुर्व्वर्ग्गफलप्रदा ॥ क्लीं क्लींक्लींरूपिकादेवीक्रींक्रींक्रींनामधारिणी ॥१२६॥ कमलाशक्ति बीजाचपाशाङ्कुशविभूषिता ॥ श्रींश्रींकारामहाविद्याश्रद्धाश्रद्धाव तीतथा ॥ १२७ ॥ ॐऐंक्लींह्रींश्रींपराच क्लीङ्कारीपरमाकला ॥ ह्रींक्लींश्रीङ्कारस्वरूपासर्व्वकर्म्मफलप्रदा ॥ १२८ ॥ सर्व्वाढ्या सर्व्वदेवीचसर्व्वसिद्धिप्रदातथा ॥ सर्व्वज्ञासर्व्वशक्तिश्चवाग्विभूति प्रदायिनी॥१२९॥सर्व्वमोक्षप्रदादेवीसर्व्वभोगप्रदायिनी॥गुणेन्द्र वल्लभावामासर्व्वशक्तिप्रदायिनी ॥१३० ॥ सर्व्वानन्दमयीचैवस र्व्वसिद्धिप्रदायिनी ॥ सर्व्वचक्रेश्वरीदेवीसर्व्वसिद्धेश्वरीतथा ॥ १३१ ॥ सर्व्वप्रियङ्करीचैवसर्व्वसौख्यप्रदायिनी ॥ सर्व्वानन्द प्रदादेवीब्रह्मानन्दप्रदायिनी ॥ १३२ ॥ मनोवाञ्छितदात्रीच मनोज्ञासमन्विता ॥ अकारादिक्षकारान्तादुर्ग्गादुर्ग्गार्त्तिना शिनी ॥ १३३ ॥ पद्मनेत्रासुनेत्राचस्वधास्वाहावषट्करी ॥ स्ववर्ग्गादेववर्ग्गाचतवर्ग्गाचसमन्विता ॥ १३४ ॥ अन्त स्स्थावेश्मरूपाचनवदुर्ग्गानरोत्तमा ॥ तत्त्वसिद्धिप्रदानीलात थानीलपताकिनी ॥ १३५ ॥ नित्यरूपानिशाकारीस्तम्भिनी मोहिनीतिच॥वशङ्करीतथोच्चाटीउन्मादीकर्षिणीतिच॥१३६॥ मातङ्गीमधुमत्ताचअणिमालघिमातथा ॥ सिद्धामोक्षप्रदानित्या नित्यानन्दप्रदायिनी ॥ १३७ ॥ रक्ताङ्गीरक्तनेत्राचरक्तचन्दनभू

षिता॥स्वल्पसिद्धिस्सुकल्पाचदिव्यचारणशुक्रभा ॥ १३८॥ स
ङ्क्रान्तिस्सर्व्वविद्याचसस्यवासरभूषिता ॥ प्रथमाचद्वितीयाचतृती
याचचतुर्त्थिका ॥१३९॥ पञ्चमीचैवषष्टीचविशुद्धासप्तमीतथा ॥
अष्टमीनवमीचैवदशम्येकादशीतथा ॥ १४० ॥ द्वादशीत्रयोद
शीचचतुर्द्दश्यथपूर्णिमा ॥ अमावस्यातथापूर्व्वाउत्तरापरिपूर्णि
मा ॥ १४१ ॥ खड्गिनीचक्रिणीघोरागदिनीशूलिनीतथा ॥ भुशु
ण्डीचापिनीबाणासर्व्वायुधविभूषणा ॥ १४२ ॥ कुलेश्वरीकुलव
तीकुलाचारपरायणा ॥ कुलकर्म्मसुरक्ताचकुलाचारप्रवर्द्धिनी ॥
॥ १४३ ॥ कीर्त्तिश्श्रीश्चरमारामाधर्म्मायैसततन्नमः ॥ क्षमाधृ
तिःस्मृतिर्म्मेधाकल्पवृक्षनिवासिनी ॥ १४४ ॥ उग्राउग्रप्रभा
गौरीवेदविद्याविबोधिनी ॥ साध्यासिद्धासुसिद्धाचविप्ररूपातथै
वच ॥ १४५ ॥ कालीकरालीकाल्याचकालदैत्यविनाशिनी ॥
कौलिनीकालिकीचैवकचटतपवर्ण्णिका ॥ १४६ ॥ जयिनीजय
युक्ताचजयदाजृम्भिणीतथा ॥ स्राविणीद्राविणीदेवीभरुण्डावि
न्ध्यवासिनी ॥१४७॥ ज्योतिर्भूताचजयदाज्वालामालासमाकु
ला॥भिन्नाभिन्नप्रकाशाचविभिन्नाभिन्नरूपिणी ॥१४८॥अश्विनी
भरणीचैवनक्षत्रसम्भवानिला ॥ काश्यपीविनताख्यातादितिजा
दितिरेवच ॥ १४९ ॥ कीर्त्तिश्कामप्रियादेवीकीर्त्त्याकीर्त्तिविव
र्द्धिनी ॥ सद्योमांससमालब्धासद्यश्छिन्नासिशङ्करा॥१५०॥दक्षि
णाचोत्तरापूर्व्वापश्चिमादिक्तथैवच ॥ अग्निर्नैर्ऋतिवायव्याईशा
न्यादिक्तथास्मृता ॥ १५१॥ ऊर्ध्वाङ्गाधोगताश्वेताकृष्णारक्ताच
पीतका॥चतुर्व्वर्ग्गाचतुर्व्वर्ण्णाचतुर्म्मात्रात्मिकाक्षरा ॥१५२॥ च
तुर्म्मुखीचतुर्व्वेदाचतुर्विद्याचतुर्म्मुखा ॥ चतुर्ग्गणाचतुर्म्मातात्रतु
र्व्वर्ग्गफलप्रदा ॥ १५३ ॥ धात्रीविधात्रीमिथुनानारीनायक

वासिनी ॥ सुरामुदासुदवतीमोदिनीमेनकात्मजा ॥ १५४ ॥ ऊर्द्धकालीसिद्धिकालीदक्षिणाकालिकाशिवा ॥ नील्यासरस्व तीसात्वम्बगलाछिन्नमस्तका ॥ १५५ ॥ सर्व्वेश्वरीसिद्धविद्याप रापरमदेवता॥हिङ्कुलाहिङ्कुलाङ्गीचहिङ्कुलाधरवासिनी ॥१५६॥ हिङ्कुलोत्तमवर्ण्णाभाहिङ्कुलाभरणाचसा॥ जाग्रतीचजगन्माताज गदीश्वरवल्लभा ॥ १५७ ॥ जनार्द्दनप्रियादेवीजययुक्ताजयप्रदा ॥ जगदानन्दकारीचजगदाह्लादकारिणी ॥ १५८ ॥ ज्ञानदानक रीयज्ञाजानकीजनकप्रिया ॥ जयन्तीजयदानित्याज्वलदग्निसम प्रभा ॥ १५९ ॥ विद्याधराचबिम्बोष्टीकैलासाचलवासिनी ॥ विभवाबडवाग्निश्चअग्निहोत्रफलप्रदा ॥ १६० ॥ मन्त्ररूपापरा देवीतथैवगुरुरूपिणी ॥ गयागङ्गागोमतीचप्रभासापुष्करापिच ॥ १६१ ॥ विन्ध्याचलरतादेवीविन्ध्याचलनिवासिनी ॥ बहूब हुसुन्दरीचकंसासुरविनाशिनी ॥ १६२ ॥ शूलिनीशूलहस्ताच वज्रावज्रहरापिच ॥ दुर्ग्गाशिवाशान्तिकरीब्रह्माणीब्राह्मणप्रिया ॥१६३॥ सर्व्वलोकप्रणेत्रीचसर्व्वरोगहरापिच॥मङ्गलाशोभनाशु द्धानिष्कलापरमाकला॥१६४॥ विश्वेश्वरीविश्वमाताललितावसि तानना ॥ सदाशिवाउमाक्षेमाचण्डिकाचण्डविक्रमा ॥ १६५ ॥ सर्व्वदेवमयीदेवीसर्व्वागमभयापहा ॥ ब्रह्मेशविष्णुनमितासर्व्वक ल्याणकारिणी ॥१६६॥ योगिनीयोगमाताचयोगीन्द्रहृदयस्थि ता ॥ योगिजायायोगवतीयोगीन्द्रानन्दयोगिनी ॥ १६७ ॥ इन्द्रादिनमितादेवीईश्वरीचेश्वरप्रिया ॥ विशुद्धिदाभयहराभ क्तद्वेषिभयङ्करी ॥ १६८ ॥ भववेषाकामिनीचभरुण्डाभयका रिणी ॥ बलभद्रप्रियाकारासंसाराण्र्णवतारिणी ॥ १६९ ॥ पञ्च भूतासर्व्वभूताविभूतिर्भूतिधारिणी ॥ सिंहवाहामहामोहामोहपा

शविनाशिनी॥१७०॥मन्दुरामदिरामुद्रामुद्रामुद्गरधारिणी॥सावित्रीचमहादेवीपरप्रियनिनायिका॥ १७१॥ यमदूतीचपिङ्गाक्षीवैष्णवीशङ्करीतथा॥चन्द्रप्रियाचन्द्ररताचन्दनारण्यवासिनी १७२ चन्दनेन्द्रसमायुक्ताचण्डदैत्यविनाशिनी॥ सर्व्वेश्वरीयक्षिणीच किरातीराक्षसीतथा॥ १७३॥ महाभोगवतीदेवीमहामोक्षप्रदायिनी॥ विश्वहन्त्रीविश्वरूपाविश्वसंहारकारिणी॥ १७४॥ धात्रीचसर्व्वलोकानांहितकारणकामिनी॥ कमलासूक्ष्मदादेवी धात्रीहरविनाशिनी॥ १७५॥ सुरेन्द्रपूजितासिद्धामहातेजोवतीतिच॥ परारूपवतीदेवीत्रैलोक्याकर्ष्णकारिणी॥ १७६॥ इतितेकथितन्देविपीतानामसहस्रकम्॥ पठेद्वापाठयेद्वापिसर्व्वसिद्धिर्भवेत्प्रिये॥ १७७॥ इतिमेविष्णुनाप्रोक्तम्महास्तम्भकरम्परम्॥प्रातःकालेचमध्याह्नेसन्ध्याकालेचपार्व्वति॥१७८॥ एकचित्तःपठेदेतत्सर्व्वसिद्धिर्भविष्यति॥ एकवारम्पठेद्यस्तुसर्व्वपापक्षयोभवेत्॥ १७९॥ द्विवारम्प्रपठेद्यस्तुविघ्नेश्वरसमोभवेत्॥ त्रिवारम्पठनाद्देविसर्व्वंसिध्यतिसर्व्वथा॥ १८०॥ स्तवस्यास्यप्रभावेणसाक्षाद्भवतिसुव्रते॥ मोक्षार्त्थीलभतेमोक्षन्धनार्त्थीलभतेधनम्॥ १८१॥ विद्यार्त्थीलभतेविद्यान्तर्क्कंव्याकरणान्विताम्॥ महित्वंवत्सरान्ताच्चशत्रुहानिःप्रजायते॥१८२॥क्षोणीपतिर्व्वशस्तस्यस्मरणेसदृशोभवेत्॥ यःपठेत्सर्व्वदाभक्त्याश्रेयस्तुभवतिप्रिये॥ १८३॥ गणाध्यक्षप्रतिनिधिःकविकाव्यपरोवरः॥ गोपनीयम्प्रयत्नेनजननीजारवत्सदा॥ १८४॥ हेतुयुक्तोभवेन्नित्यंशक्तियुक्तःसदाभवेत्॥ यइदम्पठतेनित्यंशिवेनसदृशोभवेत्॥ १८५॥ जीवन्धर्म्मार्त्थभोगीस्यान्मृतोमोक्षपतिर्भवेत्॥ सत्यंसत्यम्महादेविसत्यंसत्यन्नसंशयः॥ १८६॥

स्तवस्यास्यप्रभावेणदेवेनसहमोदते ॥ सुचित्ताश्चसुरास्सर्व्वेस्त वराजस्यकीर्त्तनात् ॥ १८७ ॥ पीताम्बरपरीधानापीतगन्धानु लेपना ॥ परमोदयकीर्त्तिःस्यात्परतस्सुरसुन्दरि ॥ १८८ ॥इति श्रीउत्कटशम्बरेनागेन्द्रप्रयाणतन्त्रेषोडशसहस्रेविष्णुशङ्करसंवा देपीताम्बरीसहस्रनामस्तोत्रंसमाप्तम् ॥

इति शाक्तप्रमोदेबगलामुखीतन्त्रं समाप्तम् ।

